संर-भा 7 क्र.नं.४०

स्तोत्र

विष्णु सहस्त्रनाम

६९८ / स्तो. ३६३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

1

अथविष्णुसहस्रनामस्तोत्रारंभः
श्रीसीतारामचंद्रप्रसन्नोस्तु

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

वि॰ स॰ १ (2)

श्रीगणेशाय नमः ॥ ॐ यस्य स्मरणमात्रेण जन्मसंसारबंधनात्
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे १ ॥ वैशंपायन उवाच ॥
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः युधिष्ठिरः शांतनवं पुनरे
वाभ्यभाषत २ ॥ युधिष्ठिर उवाच ॥ किमेकं दैवतं लोके किं वाप्येकं
परायणं स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभं ३ को धर्मः स
र्वधर्माणां भवतः परमो मतः किं जपन्मुच्यते जंतुर्जन्मसंसारबं
धनात् ४ ॥ भीष्म उवाच ॥ जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमं स्तु
वन्नामसहस्रेण पुरुषः सततोत्थितः ५ तमेव चार्चयन्नित्यं भ
क्त्या पुरुषमव्ययं ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ६ कृष्ठ १
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं लोकाध्यक्षं स्तुवन्नित्यं

2A

सर्वदुःखातिगोभवेत् ७ ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकीर्तिवर्ध
नं लोकनाथंमहद्भूतंसर्वभूतभवोद्भवं ८ एषमेसर्वधर्माणां
धर्मोधिकतमोमतः यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदा ९
परमंयोमहत्तेजःपरमंयोमहत्तपः परमंयोमहद्ब्रह्मपरमंयः
परायणं १० पवित्राणांपवित्रंयोमंगलानांचमंगलं दैवतंदे
वतानांचभूतानांयोव्ययःपिता ११ यतःसर्वाणिभूतानिभवंत्या
दियुगागमे यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षये १२ तस्यलो
कप्रधानस्यजगन्नाथस्यभूपते विष्णोर्नामसहस्रंमेशृणुपाप
भयापहं १३ यानिनामानिगौणानिविख्यातानिमहात्मनः ऋ
षिभिःपरिगीतानितानिवक्ष्याभिभूतये १४ ऋषिर्नाम्नांसहस्र

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वि०स०
२
(3)

स्यवेदव्यासोमहामुनिः छंदोनुष्टुप्तथादेवोभगवान्देवकीसुतः १५
ॐ अस्यश्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमंत्रस्य भगवान्वेदव्या
सऋषिः अनुष्टुप्छंदः श्रीकृष्णःपरमात्मादेवता अमृतांशूद्भवोभा
नुरितिबीजं देवकीनंदनःस्रष्टेतिशक्तिः शंखभृन्नंदकीचक्रीतिकी
लकं शार्ङ्गधन्वागदाधरइत्यस्त्रं त्रिसामासामगःसामेतिकवचं
श्रीमहाविष्णुप्रीत्यर्थेजपेविनियोगः अथन्यासः ॐविश्वंविष्णुर्वष
ट्कारइत्यंगुष्ठाभ्यां० अमृतांशूद्भवोभानुरितितर्जनीभ्यां० ॐब्रह्मण्यो
ब्रह्मकृद्ब्रह्मेतिमध्यमाभ्यां० सुवर्णबिंदुरक्षोभ्यइत्यनामिकाभ्यां० ॐ
निमिषोनिमिषःस्रग्वीतिकनिष्ठिकाभ्यां० एवंहृदयादि अथध्या कृष्ण
नं शांताकारंभुजगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशं २

मेघवर्णंशुभांगं लक्ष्मीकांतंकमलनयनंयोगिभिर्ध्यानगम्यंवंदे
विष्णुंभवभयहरंसर्वलोकैकनाथं ॐविश्वंविष्णुर्वषट्कारोभूत
भव्यभवत्प्रभुः भूतकृद्भूतभृद्भावोभूतात्माभूतभावनः १ पूतात्मा
परमात्माचमुक्तानांपरमागतिः अव्ययःपुरुषःसाक्षीक्षेत्रज्ञोक्षर
एवच २ योगोयोगविदांनेताप्रधानपुरुषेश्वरः नारसिंहवपुःश्री
मान्केशवःपुरुषोत्तमः ३ सर्वःशर्वःशिवःस्थाणुर्भूतादिर्निधिरव्य
यः संभवोभावनोभर्ताप्रभवःप्रभुरीश्वरः ४ स्वयंभूःशंभुरादित्यः
पुष्कराक्षोमहास्वनः अनादिनिधनोधाताविधाताधातुरुत्तमः
अप्रमेयोहृषीकेशःपद्मनाभोमरप्रभुः विश्वकर्मामनुस्त्वष्टास्थवि
ष्ठःस्थविरोध्रुवः ६ अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्रतर्दनः

प्रभूतस्त्रिककुब्धामपवित्रंमंगलंपरं ७ ईशानःप्राणदःप्राणोज्येष्ठः
श्रेष्ठःप्रजापतिः हिरण्यगर्भोभूगर्भोमाधवोमधुसूदनः ८ ईश्वरो
विक्रमीधन्वीमेधावीविक्रमःक्रमः अनुत्तमोदुराधर्षःकृतज्ञःकृति
रात्मवान् ९ सुरेशःशरणंशर्मविश्वरेताःप्रजाभवः अहःसंवत्स
रोव्यालःप्रत्ययःसर्वदर्शनः १० अजःसर्वेश्वरःसिद्धःसिद्धिःसर्वादि
रच्युतः वृषाकपिरमेयात्मासर्वयोगविनिःसृतः ११ वसुर्वसुमनाः
सत्यःसमात्मासंमितःसमः अमोघःपुंडरीकाक्षोवृषकर्मावृषाकृ
तिः १२ रुद्रोबहुशिराबभ्रुर्विश्वयोनिःशुचिश्रवाः अमृतःशाश्वत
स्थाणुर्वरारोहोमहातपाः १३ सर्वगःसर्वविद्भानुर्विष्वक्सेनोजनार्द
नः वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः १४ लोकाध्यक्षःसुराध्य

सर्वैरर्थजातैःपरिछिन्नोमितःसर्वैरपरिछिन्नोऽमितइत्यसमितोवा ४

4A

क्षोधर्माध्यक्षःकृताकृतः चतुरात्माचतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः १५
भ्राजिष्णुर्भोजनंभोक्तासहिष्णुर्जगदादिजः अनघोविजयोजेताविश्व
योनिःपुनर्वसुः १६ उपेंद्रोवामनःप्रांशुरमोघःशुचिरूर्जितः अतींद्रः
संग्रहःसर्गोधृतात्मानियमोयमः १७ वेद्योवैद्यःसदायोगीवीरहामा
धवोमधुः अतींद्रियोमहामायोमहोत्साहोमहाबलः १८ महाबुधि
र्महावीर्योमहाशक्तिर्महाद्युतिः अनिर्देश्यवपुःश्रीमानमेयात्मामहा
द्रिधृक् १९ महेष्वासोमहीभर्ताश्रीनिवासःसतांगतिः अनिरुद्धःसुरा
नंदोगोविंदोगोविदांपतिः २० मरीचिर्दमनोहंसःसुपर्णोभुजगोत्तमः
हिरण्यनाभःसुतपाःपद्मनाभःप्रजापतिः २१ अमृत्युःसर्वदृक्सिंहः
संधातासंधिमान्स्थिरः अजोदुर्मर्षणःशास्ताविश्रुतात्मासुरारिहा २२

वि॰स॰
४
(5)

गुरुर्गुरुतमोधामसत्यःसत्यपराक्रमः निमिषोनिमिषःस्रग्वीवाचस्प
तिरुदारधीः २३ अग्रणीर्ग्रामणीःश्रीमान्न्यायोनेतासमीरणः सह
स्रमूर्धाविश्वात्मासहस्राक्षःसहस्रपात् २४ आवर्तनोनिवृत्तात्मासं
वृतःसंप्रमर्दनः अहःसंवर्तकोवह्निरनिलोधरणीधरः २५ सुप्रसा
दःप्रसन्नात्माविश्वधृग्विश्वभुग्विभुः सत्कर्तासत्कृतःसाधुर्जह्नुर्नारा
यणोनरः २६ असंख्येयोऽप्रमेयात्माविशिष्टःशिष्टकृच्छुचिः सिद्धा
र्थःसिद्धसंकल्पःसिद्धिदःसिद्धिसाधनः २७ वृषाहीवृषभोविष्णुर्वृषप
र्वावृषोदरः वर्द्धनोवर्द्धमानश्चविविक्तःश्रुतिसागरः २८ सुभुजोदु
र्धरोवाग्मीमहेंद्रोवसुदोवसुः नैकरूपोबृहद्रूपःशिपिविष्टःप्रकाशनः कृष्ण
ओजस्तेजोद्युतिधरःप्रकाशात्माप्रतापनः ऋद्धःस्पष्टाक्षरोमंत्रश्च ४

5A

द्रांशुर्भास्करद्युतिः ३० अमृतांशूद्भवोभानुःशशबिंदुःसुरेश्वरः ओष
धंजगतःसेतुःसत्यधर्मपराक्रमः ३१ भूतभव्यभवन्नाथःपवनःपाव
नोनलः कामहाकामकृत्कांतःकामःकामप्रदःप्रभुः ३२ युगादिकृद्यु
गावर्तोनैकमायोमहाशनः अदृश्योव्यक्तरूपश्चसहस्रजिदनंतजित्
इष्टोविशिष्टःशिष्टेष्टःशिखंडीनहुषोवृषः क्रोधहाक्रोधकृत्कर्तावि
श्वबाहुर्महीधरः ३४ अच्युतःप्रथितःप्राणःप्राणदोवासवानुजः अ
पांनिधिरधिष्ठानमप्रमत्तःप्रतिष्ठितः ३५ स्कंदःस्कंदधरोधुर्योवर
दोवायुवाहनः वासुदेवोबृहद्भानुरादिदेवःपुरंदरः ३६ अशोकस्ता
रणस्तारःशूरःशौरिर्जनेश्वरः अनुकूलःशतावर्तःपद्मीपद्मनिभेक्ष
णः ३७ पद्मनाभोरविंदाक्षःपद्मगर्भःशरीरभृत् महर्द्धिरृद्धोवृद्धा

सन्मार्गेवर्तिनामभीमइति

वि०स०
५
(6)

त्मामहाक्षोगरुडध्वजः ३८ अतुलःशरभोभीमःसमयज्ञोहविर्हरिः
सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ३९ विक्षरोरोहितोमा
र्गोहेतुर्दामोदरःसहः महीधरोमहाभागोवेगवानमिताशनः ४० उद्भ
वःक्षोभणोदेवःश्रीगर्भःपरमेश्वरः करणंकारणंकर्ताविकर्तागहनो
गुहः ४१ व्यवसायोव्यवस्थानःसंस्थानःस्थानदोध्रुवः परर्द्धिःपर
मस्पष्टस्तुष्टःपुष्टःशुभेक्षणः ४२ रामोविरामोविरजोमार्गोनेयोन नौ
योनयः वीरःशक्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः ४३ वैकुंठःपुरुषः
प्राणःप्राणदःप्रणवःपृथुः हिरण्यगर्भःशत्रुघ्नोव्याप्तोवायुरधोक्षजः
ऋतुःसुदर्शनःकालःपरमेष्ठीपरिग्रहः उग्रःसंवत्सरोदक्षोविश्रा रूछ
मोविश्वदक्षिणः ४५ विस्तारःस्थावरस्थाणुःप्रमाणंबीजमव्ययं ५

५ विगतंरजोयस्यविषयसेवायामितिविरजः॥विरजः
परआकाशादितिश्रुतेः ५

Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

6A

अर्थोनर्थोमहाकोशोमहाभोगोमहाधनः ४६ अनिर्विण्णःस्थविष्ठो
भूर्धर्मयूपोमहामखः नक्षत्रनेमिर्नक्षत्रीक्षमःक्षामःसमीहनः ४७
यज्ञइज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः सर्वदर्शीविमुक्तात्मास
र्वज्ञोज्ञानमुत्तमं ४८ सुव्रतःसुमुखःसूक्ष्मःसुघोषःसुखदःसुहृत्
मनोहरोजितक्रोधोवीरबाहुर्विदारणः ४९ स्वापनःस्ववशोव्यापी
नैकात्मानैककर्मकृत् वत्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ५०
धर्मगुब्धर्मकृद्धर्मीसदसत्क्षरमक्षरं अविज्ञातासहस्रांशुर्विधाता
कृतलक्षणः ५१ गभस्तिनेमिःसत्वस्थःसिंहोभूतमहेश्वरः आदि
देवोमहादेवोदेवेशोदेवभृद्गुरुः ५२ उत्तरोगोपतिर्गोप्ताज्ञानगम्यः
पुरातनः शरीरभूतभृद्भोक्ताकपींद्रोभूरिदक्षिणः ५३ सोमपोमृ

"Joint project of Rajarshi Sahu ... and the Yashwantrao Chavan Pratishthan, Mumbai."

वि०स० ६ (7)

नघःसोमःपुरुजित्पुरुसत्तमः विनयोजयःसत्यसंधोदाशार्हःसात्व
तांपतिः ५४ जीवोविनयितासाक्षीमुकुंदोमितविक्रमः अंभोनिधि
रनंतात्मामहोदधिशयोंतकः ५५ अजोमहार्हःस्वाभाव्योजितामित्रः
प्रमोदनः आनंदोनंदनोनंदःसत्यधर्मात्रिविक्रमः ५६ महर्षिःकपि
लाचार्यःकृतज्ञोमेदिनीपतिः त्रिपदस्त्रिदशाध्यक्षोमहाशृंगःकृतां
तकृत् ५७ महावराहोगोविंदःसुषेणःकनकांगदी गुह्योगभीरोग
हनोगुप्तश्चक्रगदाधरः ५८ वेधाःस्वांगोजितःकृष्णोदृढःसंकर्षणोऽ
च्युतः वरुणोवारुणोवृक्षःपुष्कराक्षोमहामनाः ५९ भगवान्भगहा
नंदीवनमालीहलायुधः आदित्योज्योतिरादित्यःसहिष्णुर्गतिसत्त
मः ६० सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः दिवस्पृक्सर्वदृग्व्यासो

३ वरुणात्रांसायंगत आदित्योवरुणः।स्वरश्मिसंवरणात्सायंगतःसूर्योवरुणः॥ इमंमेवरुणेतिमंत्रवर्णात् ३

कृष्ण
वि ६

7A

वाचस्पतिरयोनिजः ६१ त्रिसामासामगःसामनिर्वाणंभेषजंभिषक्
संन्यासकृच्छमःशांतोनिष्ठाशांतिःपरायणं ६२ शुभांगःशांतिदःस्र
ष्टाकुमुदःकुवलेशयः गोहितोगोपतिर्गोप्तावृषभाक्षोवृषप्रियः ६३
अनिवर्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः श्रीवत्सवक्षाःश्रीवासः
श्रीपतिःश्रीमतांवरः ६४ श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीविभा
वनः श्रीधरःश्रीकरःश्रेयःश्रीमान्लोकत्रयाश्रयः ६५ स्वक्षःस्वंगःश
तानंदोनंदीज्योतिर्गणेश्वरः विजितात्माविधेयात्मासत्कीर्तिश्छिन्नसं
शयः ६६ उदीर्णःसर्वतश्चक्षुरनीशःशाश्वतस्थिरः भूशयोभूषणो
भूतिर्विशोकःशोकनाशनः ६७ अर्चिष्मानर्चितःकुंभोविशुद्धात्मावि
शोधनः अनिरुद्धोप्रतिरथःप्रद्युम्नोमितविक्रमः ६८ कालनेमिनि

वि०स०

७

(४)

निहावीरःशौरिःशूरजनेश्वरः त्रिलोकात्मात्रिलोकेशः केशवःकेशिहा
हरिः ६९ कामदेवःकामपालःकामीकांतःकृतागमः अनिर्देश्यवपु
र्विष्णुर्वीरोनंतोधनंजयः ७० ब्रह्मण्योब्रह्मकृद्ब्रह्माब्रह्मब्रह्मविव
र्धनः ब्रह्मविद्ब्राह्मणोब्रह्मीब्रह्मज्ञोब्राह्मणप्रियः ७१ महाक्रमो
महाकर्मामहातेजामहोरगः महाक्रतुर्महायज्वामहायज्ञोमहाहविः
स्तव्यःस्तवप्रियस्तोत्रंस्तुतिःस्तोतारणप्रियः पूर्णःपूरयितापुण्यः
पुण्यकीर्तिरनामयः ७३ मनोजवस्तीर्थकरोवसुरेतावसुप्रदः व
सुप्रदोवासुदेवोवसुर्वसुमनाहविः ७४ सद्गतिःसत्कृतिःसत्तासद्भू
तिःसत्परायणः शूरसेनोयदुश्रेष्ठःसन्निवासःसुयामुनः ७५ भू  कृष्ण
तावासोवासुदेवःसर्वासुनिलयोनलः दर्पहादर्पदोदृप्तोदुर्धरोथा  ७

धृताविगलितांआशिषःप्रार्थनीयस्येतिधृतांशी:

परान्जितः ७६ विश्वमूर्तिर्महामूर्तिर्दशमूर्तिरमूर्तिमान् अनेक
मूर्तिरव्यक्तःशतमूर्तिःशतााननः ७७ एकोनेकःसवःकःकिंयत्तत्प
दमनुत्तमं लोकबंधुर्लोकनाथोमाधवोभक्तवत्सलः ७८ सुवर्ण
वर्णोहेमांगोवरांगश्चंदनांगदी वीरहाविषमःशून्योधृतांशीरचल
श्चलः ७९ अमानीमानदोमान्योलोकस्वामीत्रिलोकधृक् सुमे
धामेधजोधन्यःसत्यमेधाधराधरः ८० तेजोवृषोद्युतिधरःसर्वश
स्त्रभृतांवरः प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः ८१ चतुर्मूर्ति
श्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः चतुरात्माचतुर्भावश्चतुर्वेदविदेकपा
त् ८२ समावर्तोनिवृत्तात्मादुर्जयोदुरतिक्रमः दुर्लभोदुर्गमोदुर्गो
दुरावासोदुरारिहा ८३ शुभांगोलोकसारंगःसुतंतुस्तंतुवर्धनः इं

Rajarshi Shahu Maharaj Dhule and Yashwantrao Chavan Pratishthan, Mumbai

स्मृतिमात्रेणंपुनातीतिपवनः ५

वि०स० ८ (9)

द्रकर्मामहाकर्माकृतकर्माकृतागमः ८४ उद्भवःसुंदरःसुंदोरत्ननाभः
सुलोचनः अर्कोवाजसनःशृंगीजयंतःसर्वविज्जयी ८५ सुवर्णबिंदु
रक्षोभ्यःसर्ववागीश्वरेश्वरः महाह्रदोमहागर्तोमहाभूतोमहानिधिः
कुमुदःकुंदरःकुंदःपर्जन्यःपावनोनिलः अमृताशोमृतवपुःसर्वज्ञःस
र्वतोमुखः ८७ सुलभःसुव्रतःसिद्धःशत्रुजिच्छत्रुतापनः न्यग्रोधो
दुंबरोश्वत्थश्चाणूरांध्रनिषूदनः ८८ सहस्रार्चिःसप्तजिह्वःसप्तैधाःस
प्तवाहनः अमूर्तिरनघोचिंत्योभयकृद्भयनाशनः ८९ अणुर्बृहत्कृ
शःस्थूलोगुणभृन्निर्गुणोमहान् अधृतःस्वधृतःस्वास्यःप्राग्वंशोवंशव
र्धनः ९० भारभृत्कथितोयोगीयोगीशःसर्वकामदः आश्रमःश्रमणः
क्षामःसुपर्णोवायुवाहनः ९१ धनुर्धरोधनुर्वेदोदंडोदमयितादमः

कृष्ण ८

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

9A

अपियंतिजगंतियस्मिन्नित्यप्ययः ६ अथर्वोयमनियमगमत्वात्तथा
असुखंस्वंइयतीत्यसुखदोवा ४

अपराजितःसर्वसहोनियंतानियमोयमः ९३ सत्ववान्सात्विकःस
त्यःसत्यधर्मपरायणः अभिप्रायःप्रियार्होर्हःप्रियकृत्प्रीतिवर्धनः
विहायसगतिर्ज्योतिःसुरुचिर्हुतभुग्विभुः रविर्विरोचनःसूर्यःसवि
तारविलोचनः ९४ अनंतोहुतभुग्भोक्तासुखदोनेकजोग्रजः अनि
र्विण्णःसदामर्षीलोकाधिष्ठानमद्भुतः ९५ सनात्सनातनतमःकपिलः
कपिरप्ययः स्वस्तिदःस्वस्तिकृत्स्वस्तिस्वस्तिभुक्स्वस्तिदक्षिणः ९६ अ
रौद्रःकुंडलीचक्रीविक्रम्यूर्जितशासनः शब्दातिगःशब्दसहःशिशिरः
शर्वरीकरः ९७ अक्रूरःपेशलोदक्षोदक्षिणःक्षमिणांवरः विद्वत्तमो
वीतभयःपुण्यश्रवणकीर्तनः ९८ उत्तारणोदुष्कृतिहापुण्योदुःस्वप्न
नाशनः वीरहारक्षणःसंतोजीवनःपर्यवस्थितः ९९ अनंतरूपोऽनं

निर्विण्णः

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

वि०स०
९
(10)

ब्याप्यसमवेतश्चतुरस्त्रःपुंसांकर्मानुरूपंफलंप्रयच्छतीति

श्री

नश्रीर्जितमन्युर्भयापहः चतुरस्त्रोगभीरात्माविदिशोव्यादिशोदिशः
अनादिर्भूर्भुवोलक्ष्मीःसुवीरोरुचिरांगदः जननोजनजन्मादिर्भी
मोभीमपराक्रमः १०१ आधारनिलयोधाताषुष्पहासःप्रजागरः
ऊर्ध्वगःसत्पथाचारःप्राणदःप्रणवःपणः १०२ प्रमाणंप्राणनिलयः
प्राणभृत्प्राणजीवनः तत्वंतत्वविदेकात्माजन्ममृत्युजरातिगः १०३
भूर्भुवःस्वस्तरुस्तारःसवितांप्रपितामहः यज्ञोयज्ञपतिर्यज्वायज्ञां
गोयज्ञवाहनः १०४ यज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्यज्ञसाधनः यज्ञां
तकृद्यज्ञगुह्यमन्नमन्नादएवच १०५ आत्मयोनिःस्वयंजातोवैखा
नःसामगायनः देवकीनंदनःस्त्रष्टाक्षितीशःपापनाशनः १०६ शं
खभृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः रथांगपाणिरक्षोभ्यःसर्वप्र

सर्वस्यलोकस्यजनकइतिसपिता५

कृष्ण
९

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

10A

हरणायुधः १०७ सर्वप्रहरणायुध ॐ नमइति १०८ इतीदंकी
र्तनीयस्यकेशवस्यमहात्मनः नाम्नांसहस्रंदिव्यानामशेषेणप्रकी
र्तितं ९ यइदंश्रृणुयान्नित्यंयश्चापिपरिकीर्तयेत् नाशुभंप्राप्नुया
त्किंचित्सोमुत्रेहचमानवः १० वेदांतगोब्राह्मणःस्यात्क्षत्रियोविज
यीभवेत् वैश्योधनसमृद्धःस्याच्छूद्रःसुखमवाप्नुयात् ११ धर्मा
र्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् कामानवाप्नुयात्कामीप्र
जार्थीलभतेसुतान् १२ भक्तिमान्यःसदोत्थायशुचिस्तद्गतमानसः
सहस्रंवासुदेवस्यनाम्नामेतत्प्रकीर्तयेत् १३ यशःप्राप्नोतिविपु
लंज्ञातिप्राधान्यमेवच अचलांश्रियमाप्नोतिश्रेयःप्राप्नोत्यनुत्तमं
नभयंक्वचिदाप्नोतिवीर्यंतेजश्चविंदति भवत्यरोगोद्युतिमान्बल

रूपगुणान्वितः १५ रोगार्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात्
भयान्मुच्येतभीतस्तुमुच्येतापन्नआपदः १६ दुर्गाण्यतितर
त्याशुपुरुषःपुरुषोत्तमं स्तुवन्नामसहस्रेणनित्यंभक्तिसम
न्वितः १७ वासुदेवाश्रयोमर्त्योवासुदेवपरायणः सर्वपाप
विशुद्धात्मायातिब्रह्मसनातनं १८ नवासुदेवभक्तानामशु
भंविद्यतेक्वचित् जन्ममृत्युजराव्याधिभयंनैवोपजायते
इमंस्तवमधीयानःश्रद्धाभक्तिसमन्वितः युज्येतात्मसुखक्षां
तिश्रीधृतिस्मृतिकीर्तिभिः २० नक्रोधोनचमात्सर्यंनलोभो
नाशुभामतिः भवंतिकृतपुण्यानांभक्तानांपुरुषोत्तमे २१ द्यौः
सचंद्रार्कनक्षत्राखंदिशोभूर्महोदधिः वासुदेवस्यवीर्येणविधृ

अकारानुबंधरहितेननकारेणसमस्तंपदत्रयंअक्रोधाद्यर्थाभवं
तीत्यर्थः ३

11A

तानिमहात्मनः २२ ससुरासुरगंधर्वंसयक्षोरगराक्षसं ज
गद्वशेवर्ततेदंकृष्णस्यसचराचरं २३ इंद्रियाणिमनोबुद्धिःस
त्वंतेजोबलंधृतिः वासुदेवात्मकान्याहुःक्षेत्रंक्षेत्रज्ञएवच २४
सर्वागमानामाचारःप्रथमंपरिकल्पते आचारप्रभवोधर्मोध
र्मस्यप्रभुरच्युतः २५ ऋषयःपितरोदेवामहाभूतानिधातवः
जंगमाजंगमंचेदंजगन्नारायणोद्भवं २६ योगोज्ञानंतथासांख्यं
विद्याःशिल्पादिकर्मच वेदाःशास्त्राणिविज्ञानमेतत्सर्वंजनार्द
नात् २७ एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः त्रींलोकान्व्या
प्यभूतात्माभुंक्तेविश्वभुगव्ययः २८ इमंस्तवंभगवतोविष्णोर्व्या
सेनकीर्तितं पठेद्यइच्छेत्पुरुषःश्रेयःप्राप्तुंसुखानिच २९ विश्वे

श्वरमजंदेवंजगतःप्रभुमव्ययं भजंतियेपुष्कराक्षंननेयांतिप
राभवं ३०॥अर्जुनउवाच॥पद्मपत्रविशालाक्षपद्मनाभसुरो
त्तम भक्तानामनुरक्तानांत्राताभवजनार्दन ३१॥श्रीभगवानु
वाच॥योमांनामसहस्रेणस्तोतुमिच्छतिपांडव सोहमेकेनश्लो
केनस्तुतएवनसंशयः ३२ नमोस्त्वनंतायसहस्रमूर्तयेसहस्र
पादाक्षिशिरोरुबाहवे सहस्रनाम्नेपुरुषायशाश्वतेसहस्रको
टियुगधारिणेनमः ३३ एषनिष्कंटकःपंथायत्रसंपूज्यतेहरिः
कुपथंतंविजानीयाद्गोविंदरहितागमं ३४ आकाशात्पतितं
तोयंयथागच्छतिसागरं सर्वदेवनमस्कारःकेशवंप्रतिगच्छति
विष्णोर्नामसहस्रंतुयःसदापठतेनरः सर्वान्कामानवाप्नोतिवि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

12A

ह्मलोकेमहीयते १३६॥इतिश्रीमन्महाभारतेशतसाहस्रसंहिता
यांवैयासिक्यांशांतिपर्वणिभीष्मयुधिष्ठिरसंवादेश्रीविष्णोर्दि
व्यसहस्रनामस्तोत्रंसंपूर्णम्॥ ॥छ॥ ॥श्रीकृष्णार्पणम
स्तु

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com